# CSM – 45/20

# Indian Language & Literature in Sanskrit

## Paper – II

*Time : 3 hours*

*Full Marks : 300*

*The figures in the right-hand margin indicate marks.*

*The question must be answered in Sanskrit Using Devnagri Scripts*

*Candidates should attempt Q. No. 1 from Section – A and Q. No. 5 from Section – B which are compulsory and any* ***three*** *of the remaining questions, selecting at least* ***one*** *from each Section.*

## SECTION – A

1. अधोलिखितेषु कानिचित् **त्रीणि** प्रतिपादयत : 20×3 = 60

   (क) संस्कृतगद्यसाहित्यस्य उत्पत्तिः विकासश्च

   (ख) गीता सुगीता कर्त्तव्या

   (ग) सांख्य-तत्त्वमीमांसा

   (घ) भासनाटकचक्रम्

2. सुन्दरे किं न सुन्दरमिति कथनं समीक्ष्यतम् । 60

3. मृच्छकटिके प्रतिपादित-समाजस्य चित्रणम् कुरुत । 60

4. उपनिषदां महत्त्वं प्रतिपादयत । 60

## SECTION – B

5. A, B, C, D इति उपवर्गेषु केषाञ्चित् **त्रयाणां** व्याख्या विधेया : 20×3 = 60

[A] (क) तथापि जिह्मः सः भवज्जिगीषया
तनोति शुभ्रं-गुणसम्पदा यशः ।
समुन्नयन् भूतिमनार्यसंगमाद् वरं
विरोधोऽपि सममहात्मभिः ॥

(ख) रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् ।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥ 20

[B] (क) यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥

(ख) न जायते म्रियते वा कदाचिन्नायं
भूत्वा भविता वा-न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो,
न हन्यते हन्यमाने शरीरे ॥

20

[C] (क) धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः ।
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे ।
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥ 20

(ख) व्यालं बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते ।
छेत्तुं वज्रमणिञ्छिरीषकुसुमप्रान्तेन संनह्यते ।
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते ।
नेतुं वाञ्छति यः खलान्पथि सतां सूक्तैः सुधास्यन्दिभिः ॥
20

[A] (क) इयं गेहे लक्ष्मीरियममृतवर्तिनयनयो-
रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः ।
अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः
किमस्याः न प्रेयो यदि परमसह्यस्तु विरहः ॥

(ख) शुश्रूषस्व गुरून् कुरु प्रियसखिवृत्तिं सपत्नीजने ।
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भागेष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥
20

6. कुमारसम्भवस्य प्रथमसर्गस्य प्रथमश्लोकादारभ्य दशमश्लोकपर्यन्तं वर्णितं नगाधिराजस्य हिमालयस्य वर्णनं स्वशब्दैः विशदीक्रियताम् । 60

7. (क) शुकनासोपदेशमाश्रित्य लक्ष्म्याः चरित्र-चित्रणं कुरुत । 30

(ख) अधोलिखितयोर्व्याख्यां कुरुतः 15×2 = 30

(i) प्रियं जनमपश्यन्तीं पश्यन्तीं राक्षसीगणम् ।
स्वगणेन मृगीं हीनां श्वगणेनावृतामिव ॥

(ii) ऋज्वायतां च विरलां च नतोन्नतां च
सप्तर्षिवंशकुटिलां च निवर्तनेषु ।
निर्मुच्यमानभुजगोदरनिर्मलस्य
सीमामिवाम्बरतलस्य विभज्यमानम् ॥

8. निम्नलिखितेषु प्रश्नेषु एकमुत्तरीयताम् : 60

(क) वेदान्तसारे प्रतिपादितं साधनचतुष्टयं व्याख्यायताम् ।

(ख) ब्रह्मावर्तार्यावर्तयोः स्वरूपं तत्रत्यं च आचारं मनुस्मृतिमवलम्ब्य प्रतिपादयत ।

(ग) सांख्यमतानुसारं प्रकृतिविकृत्योः विवरणं प्रस्तूयताम् ।